॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## पञ्चमकाण्डे पञ्चमः प्रश्नः

### वायव्यपश्वाद्यानं निरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यदे॒के॑न सङ्ँ॒स्था॒पय॑ति य॒ज्ञस्य॒ सन्त॑त्या॒ अवि॑च्छेदायै॒न्द्राः प॒शवो॒ ये मु॒ष्क॒रा यदै॒न्द्राः
सन्तो॒ऽग्निभ्य॑ आल॒भ्यन्ते॑ दे॒वता᳚भ्यः स॒मद॑न्दधात्या ग्ने॒यी स्त्रि॒ष्टुभौ॑ याज्यानुवा॒क्या᳚ः कुर्या॒द् यदा᳚-
ग्ने॒यीस्तेना᳚ऽऽ*ग्ने॒या यत् त्रि॒ष्टुभ॒स्तेनै॒न्द्राः समृ॑द्ध्यै॒ न दे॒वता᳚भ्यः स॒मद॑न्दधाति वा॒यवे॑ नि॒यु-
त्व॑ते तू॒परमा ल॑भते॒ तेजो॒ऽग्नेर् वा॒यु स्तेज॑स ए॒ष आ ल॑भ्यते॒ तस्मा᳚द्य॒द्रिय॑ङ् वा॒युर् ॥ [१] ॥
वाति॑ त॒द्रिय॑ङ्ङ॒ग्निर् द॑हति॒ स्वमे॒व तत् तेजो॒ऽन्वे॑ति॒ यन्न नि॒युत्व॑ते॒ स्यादुन्मा᳚द्ये॒द्यज॑मानो नि॒युत्व॑ते
भव॑ति॒ यज॑मान॒स्याऽनु॑न्मादाय वा॒युम॑ती᳚ श्वे॒तव॑ती याज्यानुवा॒क्ये॑ भवतः सतेज॒स्त्वाय॑ हिरण्य-
ग॒र्भः सम॑वर्त॒ताग्र॒ इत्या॑घा॒रमा घा॑रयति प्र॒जाप॑ति॒र् वै हिर॑ण्यग॒र्भः प्र॒जाप॑तेरनु॒रूप॒त्वाय॒ सर्वा॑णि
वा ए॒ष रू॒पाणि॑ पशू॒नाम्प्र॒त्या ल॑भ्यते॒ यच्छ्म॑श्रु॒ण स्तत् ॥ [२] ॥ पुरु॑षाणाꣳ रू॒पय्ँ॑यत् तू॒पर
स्तदश्वा॑ना॒य्ँय॑द॒न्यतो॑द॒न् तद्ग॒वाय्ँ॑यद॒व्या॑ इव श॒फा स्तदवी॑ना॒य्ँय॑द॒ज स्तद॒जाना᳚व्ँ॒वायुर् वै प॑शू॒ना-
म्प्रि॒यन्धाम॒ यद्वा॑य॒व्यो॑ भव॑त्ये॒तमे॒वैन॑म॒भि सं॑जाना॒नाः प॒शव॒ उप॑ तिष्ठन्ते वाय॒व्य॑ः का॒र्या(३)ः
प्रा॑जाप॒त्या(३) इत्या॑हु॒र् यद्वा॑य॒व्य॑ङ्कु॒र्यात् प्र॒जाप॑तेरिया॒द् यत् प्रा॑जाप॒त्यङ्कु॒र्याद्वा॒यो ॥ [३] ॥
रि॑या॒द्यद्वा॑य॒व्य॑ः प॒शुर् भव॑ति॒ तेन॑ वा॒योर् नैति॒ यत् प्रा॑जाप॒त्यः पु॑रो॒डाशो॒ भव॑ति॒ तेन॑ प्र॒जाप॑ते॒र्
नैति॒ यद् द्वाद॑शकपाल॒ स्तेन॑ वैश्वान॒रान्नैत्या᳚ग्नावैष्ण॒वमेका॑दशकपाल॒न्निर् व॑पति दीक्षि॒ष्यमा॑-
णो॒ऽग्निः सर्वा॑ दे॒वता॒ विष्णु॒र् य॒ज्ञो दे॒वता᳚श्चै॒व य॒ज्ञञ्चाऽऽ*र॑भते॒ऽग्निर॑व॒मो दे॒वता॑ना॒व्ँविष्णु॑ः पर॒मो
यदा᳚ग्नावैष्ण॒वमेका॑दशकपाल॒न्निर्व॑पति दे॒वता॑ ॥ [४] ॥ ए॒वोभ॒यत॑ः परि॒गृह्य॒ यज॑मा॒नोऽव॑ रुन्धे

पुरोडाशेन वै देवा अमुष्मिँल्लोक आर्ध्नुवन् चरुणाऽस्मिन्यः कामयेताऽमुष्मिँल्लोक ऋध्नुया-
मिति स पुरोडाशङ्कुर्वीताऽमुष्मिन्नेव लोक ऋध्नोति यदष्टाकपाल स्तेनाऽऽग्नेयो यत् त्रिकपाल-
स्तेन वैष्णवः समृद्ध्यै यः कामयेतास्मिँल्लोक ऋध्नुयामिति स चरुङ्कुर्वीताग्नेर् घृतव्विष्णोस्त-
ण्डुलास्तस्मा ॥ [५] ॥ च्चरुः कार्योऽस्मिन्नेव लोक ऋध्नोत्यादित्यो भवतीयव्वा अदितिर्-
स्यामेव प्रति तिष्ठत्यथो अस्यामेवाधि यज्ञन्तनुते यो वै सव्वथ्सरमुख्यमभृत्वाऽग्निञ्चिनुते यथा
सामि गर्भोऽवपद्यते तादृगेव तदार्तिमार्च्छेद्वैश्वानरन्द्वादशकपालम्पुरस्तान्निर् वपेथ् सव्वथ्सरो
वा अग्निर् वैश्वानरो यथा सव्वथ्सरमाप्त्वा ॥ [६] ॥ काल आगते विजायत एवमेव सव्वथ्सर-
माप्त्वा काल आगतेऽग्निञ्चिनुते नाऽऽर्तिमार्च्छत्येषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य
तनुवमव रुन्धे त्रीण्येतानि हवीꣳषि भवन्ति त्रय इमे लोका एषाँल्लोकानाꣳ रोहाय ॥ [७] ॥
(यद्रियङ् वायुर् यच्छ्रुणस्तद् वायोर् निर्वपति देवतास्तस्मादाप्त्वा द्वात्रिꣳशच्च) ॥ १ ॥

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनु प्राविशत् ताभ्यः पुनः संभवितुन्नाशक्नोथ् सोऽब्रवीदृध्न-
वदिथ् स यो मेतः पुनः संचिनवदिति तन्देवाः समचिन्वन् ततो वै त आर्ध्नुवन्यथ् सम-
चिन्वन् तच्चित्यस्य चित्यत्वय्यँ एवव्विद्वानग्निञ्चिनुत ऋध्नोत्येव कस्मै कमग्निश्चीयत इत्या-
हुरग्निवा ॥ [८] ॥ नसानीति वा अग्निश्चीयतेऽग्निवानेव भवति कस्मै कमग्निश्चीयत इत्याहुर्
देवा मा वेदन्निति वा अग्निश्चीयते विदुरेनन्देवाः कस्मै कमग्निश्चीयत इत्याहुर् गृह्यसानीति वा
अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्नि ॥ [९] ॥
श्चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्नि-
श्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिँल्लोक उप जीवन्ति प्रजा-
पतिरग्निमचिकीषत तम्पृथिव्यब्रवीन्न मय्यग्निञ्चेष्यसेऽति मा धक्ष्यति सा त्वाऽतिदह्यमाना वि
धविष्ये ॥ [१०] ॥ स पापीयान् भविष्यसीति सोऽब्रवीत् तथा वा अहङ्करिष्यामि यथा त्वा
नातिधक्ष्यतीति स इमामभ्यमृशत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदे-
तीमामेवेष्टकाङ्कृत्वोपाधत्तानतिदाहाय यत् प्रत्यग्निञ्चिन्वीत तदभि मृशेत् प्रजापतिस्त्वा सादयतु
तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदे ॥ [११] ॥ तीमामेवेष्टकाङ्कृत्वोप धत्तेऽनतिदाहाय प्रजा-

प॑तिरकामयत॒ प्र जा॑ये॒येति॒ स ए॒तमु॒ख्य॑मपश्य॒त् तꣳ सँ॑व्वथ्स॒रम॑बिभ॒स्ततो॒ वै स प्राजा॑यत॒
तस्मा᳚थ् सँव्वथ्स॒रम्भा॒र्यः॑ प्रैव जा॑यते॒ तँव्वस॑वोऽब्रुव॒न् प्र त्वम॑जनिष्ठा व॒यम्प्रजा॑यामहा॒ इति॒ तँव्व-
सु॑भ्य॒ः प्राय॑च्छ॒त् तन्त्रीण्यहा᳚न्यबिभरु॒स्तेन॒ ॥ [१२] ॥ त्रीणि॑ च श॒तान्यसृ॑जन्त॒ त्रय॑स्त्रिꣳश-
तञ्च॒ तस्मा᳚त् त्र्य॒हम्भा॒र्यः॑ प्रैव जा॑यते॒ तान् रु॒द्रा अ॑ब्रुव॒न् प्र यू॒यम॑जनिढ्वँव्व॒यम्प्र जा॑यामहा॒ इति॒ तꣳ
रु॒द्रेभ्य॒ः प्राय॑च्छ॒न् तꣳ षडहा᳚न्यबिभरु॒ स्तेन॒ त्रीणि॑ च श॒तान्यसृ॑जन्त॒ त्रय॑स्त्रिꣳशतञ्च॒ तस्मा᳚थ्
ष॒ड॒हम्भा॒र्यः॑ प्रैव जा॑यते॒ ताना॑दि॒त्या अ॑ब्रुव॒न् प्र यू॒यम॑जनिढ्वँव्व॒यं ॥ [१३] ॥ प्र जा॑यामहा॒ इति॒
तमा॑दि॒त्येभ्य॒ः प्राय॑च्छ॒न् तन्द्वाद॒शाहा᳚न्यबिभरु॒ स्तेन॒ त्रीणि॑ च श॒तान्यसृ॑जन्त॒ त्रय॑स्त्रिꣳशतञ्च॒
तस्मा᳚द् द्वाद॒शा॒हम्भा॒र्यः॑ प्रैव जा॑यते॒ तेन॒ वै ते स॒हस्र॑मसृजन्तो॒खाꣳ स॑हस्र॒तमी᳚य्य ए॒वमु॒ख्य॑ꣳ
सा॒ह॒स्रँव्वे॒द॒ प्र स॒हस्र॑म्प॒शूना᳚प्नोति ॥ [१४] ॥

(अ॒ग्नि॒वान् प॑शु॒मान॑सा॒नीति॒ वा अ॒ग्निर् वृ॑द्धविष्ये मृशेत् प्र॒जाप॑तिस्त्वा सादयतु॒ तया॑ दे॒वत॑याऽङ्गि॒रस्व॒द् ध्रु॒वा सी॑द॒ तेन॒ ताना॑दि॒त्या
अ॑ब्रुव॒न् प्र यू॒यम॑जनिढ्वँव्व॒यं॑ चत्वारि॒ꣳ॒शच्च॑) ॥ २ ॥

---

यजु॑षा॒ वा ए॒षा क्रि॑यते॒ यजु॑षा पच्यते॒ यजु॑षा॒ वि मु॑च्यते॒ यदु॒खा सा वा ए॒षैत॒र्हि॑ या॒तया᳚म्नी॒
सा न पुन॑ः प्र॒युज्येत्या॑हु॒रग्ने॑ यु॒क्ष्वा हि ये तव॑ यु॒क्ष्वा हि दे॑व॒हूत॑मा॒ꣳ॒ इत्यु॒खाया᳚ञ्जुहोति॒ तेनै॒वै-
ना॒म्पुन॒ः प्र यु॑ङ्क्ते॒ तेनाया॑तयाम्नी॒ यो वा अ॒ग्निँय्योग॒ आग॑ते यु॒नक्ति यु॒ङ्क्ते यु॒ञ्जा॒नेष्वग्ने॑ ॥ [१५] ॥
यु॒क्ष्वा हि ये तव॑ यु॒क्ष्वा हि दे॑व॒हूत॑मा॒ꣳ॒ इत्या॑है॒ष वा अ॒ग्नेर् योग॒स्तेनै॒वैन॑ँय्युनक्ति यु॒ङ्क्ते यु॒ञ्जा॒नेषु॑
ब्रह्मवा॒दिनो॑ वद॒न्ति॒ न्य॑ङ्ङ॒ग्निश्चे॑त॒व्या(३) उत्ता॒ना(३) इति॒ वय॑सा॒ँव्वा ए॒ष प्र॑ति॒मया॑ चीयते॒ यद्-
न्निर्य॑ङ्ञ्चिनु॒यात् पृ॑ष्टि॒त ए॑न॒माहु॑तय ऋच्छेयु॒र् यदु॑त्ता॒नन्न पति॑तुꣳ शक्नु॒याद॒सु॑वर्ग्योऽस्य स्यात्
प्रा॒चीन॑मु॒त्ता॒नं ॥ [१६] ॥ पु॑रुषशी॒र्॒षमुप॑ दधाति मु॒ख॒त ए॒वैन॒माहु॑तय ऋच्छन्ति॒ नोत्ता॒नञ्चि॑-
नुते सु॒वर्ग्यो᳚ऽस्य भवति सौ॒र्या॑ जु॑होति॒ चक्षु॑रे॒वास्मि॒न् प्रति॑ दधाति॒ द्विर् जु॑होति॒ द्वे हि चक्षु॑षी
स॒मा॒न्या जु॑होति समा॒नꣳ हि चक्षु॒ः सम॑ृद्ध्यै देवासु॒राः सँय्य॑त्ता आस॒न् ते वा॒मँव्वसु॒ सन्न्य॑-
दध॒त तद् दे॒वा वा॑म॒भृता॑ऽवृञ्ज॒त तद्वा॑म॒भृतो॑ वामभृ॒त्त्वँय्यद्वा॑म॒भृत मु॒पद॑धाति वा॒म॒मे॒व तया॒ वसु॒
यज॑माना॒ भ्रातृ॑व्यस्य वृ॒ङ्क्ते हिर॑ण्यमूद्र्ध्नी᳚ भवति॒ ज्योति॒र् वै हिर॑ण्य॒ञ्ज्योति॒र् वा॒मञ्ज्योति॑षै॒वास्य॒
ज्योति॒र् वा॒मँव्वृ॑ङ्क्ते द्वि॒यजु॒र् भ॑वति॒ प्रति॑ष्ठित्यै ॥ [१७] ॥

(युञ्जानेष्वग्ने प्राचीनमुत्तानं वामभृतं चतुर्विंश्शतिश्च) ॥ ३ ॥

आपो वरुणस्य पत्नय आसन् ता अग्निरभ्यद्ध्यायत् ताः समभवत् तस्य रेतः पराऽपतत् तदियमभवद्यद् द्वितीयम्परापतत् तदसावभवदियवँवै विराडसौ स्वराड् यद्विराजावुपदधातीमे एवोप धत्ते यद्वा असौ रेतः सिञ्चति तदस्याम्प्रति तिष्ठति तत् प्र जायते ता ओषधयो ॥ [१८] ॥ वीरुधो भवन्ति ता अग्निरत्ति य एववँवेद् प्रैव जायतेऽन्नादो भवति यो रेतस्वी स्यात् प्रथमायान्तस्य चित्यामुभे उप दद्ध्यादिमे एवास्मै समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात् प्रथमायान्तस्य चित्यामन्यामुप दद्ध्यादुत्तमायामन्याꣳ रेत एवास्य सिक्तमाभ्यामुभयतः परि गृह्णाति सवँव्थ्सरन्न क ॥ [१९] ॥ ञ्चन प्रत्यवरोहेन्न हीमे कञ्चन प्रत्यवरोहतस्तदेनयोर् व्रतयँयो वा अपशीर्षाणमग्निञ्चिनुतेऽपशीर्षाऽमुष्मिँल्लोके भवति यः सशीर्षाणञ्चिनुते सशीर्षाऽमुष्मिँल्लोके भवति चित्तिञ्जुहोमि मनसा घृतेन यथा देवा इहाऽऽ*गमन् वीतिहोत्रा ऋतावृधः समुद्रस्य वयुनस्य पत्मन् जुहोमि विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳ हविरिति स्वयमातृण्णामुपधाय जुहोत्ये ॥ [२०] ॥ तद्वा अग्नेः शिरः सशीर्षाणमेवाग्निञ्चिनुते सशीर्षाऽमुष्मिँल्लोके भवति य एववँवेद सुवर्गाय वा एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वङ्क्रियतेऽसुवर्ग्यमस्य तथ् सुवर्ग्योऽग्नि श्चितिमुपधायाभि मृशेच्चित्तिमचित्तिञ्चिनवद्वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान् राये च नः स्वपत्याय देव दितिञ्च रास्वादितिमुरुष्येति यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनञ्चिनुते सुवर्ग्योऽस्य भवति ॥ [२१] ॥

(ओषधयःकंजुहोतिस्वपत्यायाष्टादश च) ॥ ४ ॥

विश्वकर्मा दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः प्रजापती रुद्रो वरुणोऽग्निर् दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नम एता वै देवता एतेषाम्पशूनामधिपतय स्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनो ॥ [२२] ॥ वदन्त्यग्नौ ग्राम्यान् पशून् प्र

दधाति शुचाऽऽरण्यानर्पयति किन्तत उच्छिꣳषतीति यद्धिरण्येष्टका उपदधात्यमृतव्वै हिर-
ण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजङ्करोति नैनान् हिनस्ति प्राणो वै प्रथमा स्वयमातृण्णा
व्यानो द्वितीयाऽपान स्तृतीयाऽनु प्राऽण्यात् प्रथमाꣳ स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ
समर्द्धयति व्यन्याद् ॥ [२३] ॥ द्वितीयामुपधाय व्यानेनैव व्यानꣳ समर्द्धयत्यपान्यात् तृती-
यामुपधायापानेनैवापानꣳ समर्द्धयत्यथो प्राणैरेवैनꣳ समिन्धे भूर् भुवः सुवरिति स्वयमातृण्णा
उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदे-
ताभिर् व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु ॥ [२४] ॥ लोकेष्वधि प्र
जायते प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदाग्निना
वै देवाः सुवर्गँल्लोकमजिगाꣳसन् तेन पतितुन्नाशक्नुवन् त एताश्चतस्रः स्वयमातृण्णा अपश्यन्
ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गँल्लोकमायन्यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति
सर्वतश्चक्षुषैव तदग्निना यजमानः सुवर्गँल्लोकमेति ॥ [२५] ॥

(ब्रह्मवादिनोव्यन्यादेषुयजमान स्त्रीणि च) ॥ ५ ॥

अग्न आ याहि वीतय इत्याहाहुतैवैनमग्निन्दूतव्वृणीमह इत्याह हूत्वैवैनव्वृणीतेऽग्निनाऽग्निः
समिध्यत इत्याह समिन्ध एवैनमग्निर् वृत्राणि जङ्घनदित्याह समिद्ध एवास्मिन्निन्द्रियन्दधा-
त्यग्नेः स्तोमम्मनामह इत्याह मनुत एवैनमेतानि वा अह्नाꣳ रूपाण्य ॥ [२६] ॥ न्वहमेवैन-
ञ्चिनुतेऽवाह्नाꣳ रूपाणि रुन्धे ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद्यातयाम्नीरन्या इष्टका अया-
तयाम्नी लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानाम्बृहस्पतिश्चायातया-
मानोऽनुचरवती भवत्यजामित्वायानुष्टुभाऽनु चरत्यात्मा वै लोकम्पृणा प्राणोऽनुष्टुप् तस्मात्
प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य सूददोहस ॥ [२७] ॥ इत्याह तस्मात् परुषिपरुषि रसः
सोमꣳ श्रीणन्ति पृश्नय इत्याहान्नव्वै पृश्न्यन्नमेवाव रुन्धेऽर्को वा अग्निरर्कोऽन्नमन्नमेवाव रुन्धे
जन्मन् देवानाव्विश स्त्रिष्वा रोचने दिव इत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोति यो वा
इष्टकानाम्प्रतिष्ठाव्वेद प्रत्येव तिष्ठति तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदेत्याहैषा वा इष्टकानाम्प्र-
तिष्ठा य एवव्वेद प्रत्येव तिष्ठति ॥ [२८] ॥

(रूपाणि सूददोहस् स्तया षोडश च) ॥ ६ ॥

सुवर्गाय वा एष लोकाय चीयते यदग्निर् वज्र एकादशिनी यदग्नावेकादशिनीम्मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर् दध्याद्यन्न मिनुयाथ् स्वरुभिः पशून् व्यर्द्धयेदेकयूपम्मिनोति नैनवँज्रेण सुवर्गा ल्लोकादन्तर्दधाति न स्वरुभिः पशून् व्यर्द्धयति वि वा एष इन्द्रियेण वीर्येणर्द्ध्यते योऽग्निञ्चिन्व न्नधिक्रामत्यैन्द्रिय ॥ [२९] ॥ र्चाऽऽक्रमणम्प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृद्ध्यते रुद्रो वा एष यदग्नि स्तस्य तिस्रः शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष आ वृश्च्यते योऽग्निञ्चिनुतेऽग्निञ्चित्वा तिसृधन्वमयाचितम्ब्राह्मणाय दद्यात् ताभ्य एव नमस्करोत्यथो ताभ्य एवाऽऽत्मानन्नि ष्क्रीणीते यत् ते रुद्र पुरो ॥ [३०] ॥ धनु स्तद्वातो अनु वातु ते तस्मै ते रुद्र सवँवथ्सरेण नम स्करोमि यत् ते रुद्र दक्षिणा धनु स्तद्वातो अनु वातु ते तस्मै ते रुद्र परिवथ्सरेण नम स्करोमि यत् ते रुद्र पश्चाद्धनु स्तद्वातो अनु वातु ते तस्मै ते रुद्रेदावथ्सरेण नम स्करोमि यत् ते रुद्रोत्तराद्धनु स्तद् ॥ [३१] ॥ वातो अनु वातु ते तस्मै ते रुद्रेदुवथ्सरेण नम स्करोमि यत् ते रुद्रोपरि धनु स्तद्वातो अनु वातु ते तस्मै ते रुद्र वथ्सरेण नम स्करोमि रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्ध स्तिष्ठत्येवँवा एष एतर्हि सञ्चितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳ शमयति येऽग्नयः ॥ [३२] ॥ पुरीष्याः प्रविष्टाः पृथिवीमनु। तेषान्त्वमस्युत्तमः प्र णो जीवातवे सुव॥ आपन्त्वाऽग्ने मनसाऽऽपन्त्वाऽग्ने तपसाऽऽपन्त्वाऽग्ने दीक्षयाऽऽपन्त्वाऽग्न उपसद्भिराप त्वाऽग्ने सुत्ययाऽऽपन्त्वाऽग्ने दक्षिणाभिरापन्त्वाऽग्नेऽवभृथेनापन्त्वाऽग्ने वशयाऽऽप त्वाऽग्ने स्वगाकारेणेत्याहै षा वा अग्नेराप्ति स्तयैवैनमाप्नोति ॥ [३३] ॥

(ऐन्द्रिया पुर उत्तराद्धनुस्त दग्नय आहा ष्टौ च) ॥ ७ ॥

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन् दधाति बृहद्रथन्तराभ्याम्पक्षावोज एवास्मिन् दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन् दधाति प्रजापतिरग्निमसृजत सोऽस्माथ् सृष्टः पराङैत् तवँवारवन्तीयेनावारयत तद्वा-

रवन्तीयस्य वारवन्तीयत्वꣳ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्व ॥ [३४] ॥ य्ँद्वार-वन्तीयेनोपतिष्ठते वारयत एवैनꣳ श्यैतेन श्येती कुरुते प्रजापतेर्हृदयेना पिपक्षम्प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति प्राच्याँ त्वा दिशा सादयामि गायत्रेण छन्दसाऽग्निना देवतयाऽग्नेः शीर्ष्णाग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसेन्द्रेण देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि प्रतीच्याँ त्वा दिशा सादयामि ॥ [३५] ॥ जागतेन छन्दसा सवित्रा देवतयाऽग्नेः पुच्छेनाग्नेः पुच्छमुप दधाम्युदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यान्देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधाम्यूर्ध्वयाँ त्वा दिशा सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतयाऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि यो वा अपात्मानमग्निञ्चिनुतेऽपा-त्माऽमुष्मिँल्लोके भवति यः सात्मानञ्चिनुते सात्माऽमुष्मिँल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निञ्चिनुते सात्माऽमुष्मिँल्लोके भवति य एवव्वेद ॥ [३६] ॥

(श्यैतत्वंप्रतीच्याँ त्वा दिशा सादयामि यः सात्मानञ्चिनुते द्वाविꣳशतिश्च) ॥ ८ ॥

अग्न उदधे या त इषुर् युवा नाम तया नो मृड तस्याँ स्ते नम स्तस्याँ स्त उप जीवन्तो भूया-स्माग्ने दुध्र गह्य किꣳशिल वन्य या त इषुर् युवा नाम तया नो मृड तस्याँ स्ते नम स्तस्याँ स्त उप जीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रो ॥ [३७] ॥ द्वितीयो गह्य स्तृतीयः किꣳशिल श्चतुर्थो वन्यः पञ्चम स्तेभ्यो यदाहुतीर् न जुहुयादध्वर्युञ्च यजमानञ्च प्र दहेयुर्यदेता आहुतीर् जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यध्वर्युर् न यजमानो वाङ्म आसन् नसोः प्राणोऽक्ष्यो श्चक्षुः कर्णयोः श्रोत्रम्बाहुवोर् बलमूरुवोरोजोऽरिष्टा विश्वा-न्यङ्गानि तनू ॥ [३८] ॥ स्तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीरप वा एतस्मात् प्राणाः क्रामन्ति योऽग्निञ्चिन्व न्नधिक्रामति वाङ्म आसन् नसोः प्राण इत्याह प्राणानेवाऽऽत्मन् धत्ते यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वा-हुतिभागा वा अन्ये रुद्रा हविर्भागा ॥ [३९] ॥ अन्ये शतरुद्रीयꣳ हुत्वा गावीधुकञ्चरुमेतेन यजुषा चरमायामिष्टकायान्नि दध्याद् भागधेयेनैवैनꣳ शमयति तस्य त्वै शतरुद्रीयꣳ हुतमि-त्याहुर् यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात् पान्तु पितरस्त्वा यमराजानः पितृभिर्

दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर् देवैः पश्चात् पान्तु द्युतान स्त्वा मारुतो मरुद्भिरुत्तरतः पातु ॥ [४०] ॥ देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनम्प्रोक्षति यथ् सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः ॥ [४१] ॥

(दुध्रस्तनूरूहविर्भागाःपातुद्वात्रिंशच्च) ॥ ९ ॥

समीची नामासि प्राची दिक् तस्यां स्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर् यश्च गोप्ता ताभ्यान्नम स्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तवाञ्जम्भे दधाम्योजस्विनी नामासि दक्षिणा दिक् तस्यां स्त इन्द्रोऽधिपतिः पृदाकुः प्राची नामासि प्रतीची दिक् तस्यां स्ते ॥ [४२] ॥ सोमोऽधिपतिः स्वजोऽवस्थावा नामास्युदीची दिक् तस्यां स्ते वरुणोऽधिपति-स्तिरश्चराजिरधिपत्नी नामासि बृहती दिक् तस्यां स्ते बृहस्पतिरधिपतिः श्वित्रो वशिनी नामासी-यन्दिक् तस्यां स्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर् यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च ॥ [४३] ॥ नो द्वेष्टि तवाञ्जम्भे दधाम्येता वै देवता अग्निञ्चितꣳ रक्षन्ति ताभ्यो यदाहुतीर् न जुहुयादध्वर्युञ्च यजमानञ्च ध्यायेयुर् यदेता आहुतीर् जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यध्वर्युर् न यजमानो हेतयो नाम स्थ तेषांवः पुरो गृहा अग्निर् व इषवः सलिलो निलिम्पा नाम ॥ [४४] ॥ स्थ तेषांवो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषांवः पश्चाद् गृहाः स्वप्नो व इषवो गह्वरोऽवस्थावानो नाम स्थ तेषांव उत्तराद् गृहा आपो व इषवः समुद्रोऽधिपतयो नाम स्थ तेषांव उपरि गृहा वर्षव इषवोऽवस्वान् क्रव्या नाम स्थ पार्थिवास्तेषांव इह गृहा ॥ [४५] ॥ अन्नंव इषवोऽनिमिषो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्च नो द्वेष्टि तवो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान् प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर् जुहोति भागधेयेनैवैनान् प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इत्य ॥ [४६] ॥ नुपरिक्रामञ्जु-होत्यपरिवर्गमेवैनान् प्रीणातीमꣳ स्तनमूर्जस्वन्तन्धयापाम्प्रप्यातमग्ने सरिरस्य मद्ध्ये। उथ्स-ञ्जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमा विशस्व॥ यो वा अग्निम्प्रयुज्य न विमुञ्चति यथाऽश्वो

युक्तोऽविमुच्यमानः क्षुध्यन् पराभवत्येवमस्याग्निः परा भवति तम्पराभवन्तँय्यजमानोऽनु परा भवति सोंऽग्निश्चित्वा लूक्षो ॥ [४७] ॥ भवतीमङ्ं स्तनमूर्जस्वन्तन्धयापामित्याज्यस्य पूर्णाङ्ं स्रुचञ्जुहोत्येष वा अग्नेर् विमोको विमुच्यैवास्मा अन्नमपि दधाति तस्मादाहुर् यश्चैवव्ँवेद यश्च न सुधायꣳ ह वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत् प्रीणाति स एनम्प्रीतः प्रीणाति वसीयान् भवति ॥ [४८] ॥

(प्रतीची दिक्तस्याँस्ते द्विष्मो यश्च निलिंपा ना मे ह गृहाइतिलूक्षोवसीयान् भवति) ॥ १० ॥

---

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिꣳशुमारो हिमवतो हस्ती ॥ [४९] ॥

(इन्द्राय राज्ञेऽष्टाविꣳशतिः) ॥ ११ ॥

---

मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदꣳश स्ते धातुः सरस्वत्यै शारिः श्येता पुरुषवाक् सरस्वते शुकः श्येतः पुरुषवागारण्योऽजो नकुलः शका ते पौष्णा वाचे क्रौञ्चः ॥ [५०] ॥

(मयुस्त्रयोविꣳशतिः) ॥ १२ ॥

---

अपान्नप्त्रे जषो नाक्रो मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः ॥ [५१] ॥

(अपा मेकान्नविꣳशतिः) ॥ १३ ॥

---

बलायाजगर आखुः सृजया शयण्डकस्ते मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कुंभीनसः पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥ [५२] ॥

(बलायाष्टादश) ॥ १४ ॥

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्रियै पिकः ख्ष्विङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः ॥ [५३] ॥

(पुरुषमृगोऽष्टादश) ॥ १५ ॥

सौरी बलाकश्यों मयूरः श्येनस्ते गन्धर्वाणाँव्वसूनाङ्कपिञ्जलो रुद्राणान्तित्तिरी रोहित् कुण्डृणाची गोलत्तिका ता अफ्सरसामरण्याय सृमरः ॥ [५४] ॥

(सौर्यष्टादश) ॥ १६ ॥

पृषतो वैश्वदेवः पित्वो न्यङ्कुः कश स्तेऽनुमत्या अन्यवापोऽर्द्धमासानाम्मासाङ्कश्यपः क्वयिः कुटरुर् दात्यौहस्ते सिनीवाल्यै बृहस्पतये शितपुटः ॥ [५५] ॥

(पृषतोऽष्टादश) ॥ १७ ॥

शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणामृतूनाञ्जहका सँव्वथ्सराय लोपा कपोत उलूकः शशस्ते नैर्ऋताः कृकवाकुः सावित्रः ॥ [५६] ॥

(शका ऽष्टादश) ॥ १८ ॥

रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गस्तरख्षुः कृष्णः श्वा चतुरख्षो गर्दभस्त इतरजनानामग्नये धूङ्ख्ष्णा ॥ [५७] ॥

(रुरुर्विꣳशतिः) ॥ १९ ॥

अलज आन्तरिक्ष उद्रो मद्गुः प्लव स्तेऽपामदित्यै हꣳससाचिरिन्द्राण्यै कीर्शा गृध्रः शितिकक्षी वाद्ध्रीणसस्ते दिव्या द्यावापृथिव्या श्वावित् ॥ [५८] ॥

(अलजाँ ऽष्टादश) ॥ २० ॥

सुपर्णः पार्जन्यो हꣳसो वृको वृषदꣳशस्त ऐन्द्रा अपामुद्रोऽर्यम्णे लोपाशः सिꣳहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान् ॥ [५९] ॥

(सुपर्णोऽष्टादश) ॥ २१ ॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः सꣳहितोऽधोरामः सावित्रो वारुणः पेत्वः ॥ [६०] ॥

(आग्नेयो द्वाविꣳशतिः) ॥ २२ ॥

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः ॥ [६१] ॥

(अश्वः षोडश) ॥ २३ ॥

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः कृष्ण एकशितिपात् पेत्वः ॥ [६२] ॥

(अग्नये द्वाविꣳशतिः) ॥ २४ ॥

## समाप्ति कोर्वैः

(यदे॒के॑न प्र॒जाप॑तिः प्रे॒णाऽनु॒ यजु॒षा ऽऽपो॑ वि॒श्वक॒र्मा ऽग्न॒ आ या॑हि सु॒वर्गा॑य॒ वज्रो॑ गाय॒त्रेणा ग्न॑ उदधे स॒मीची न्द्रा॑य म॒यु र॒पां बला॑य पुरुषमृ॒गः सौ॒री पृ॒षतः शका॒ रुरु॑ र॒लजः सु॒प॑र्ण आ᳚ग्ने॒यो ऽश्वो॒ ऽग्नयेऽनी॑कवते॒ चतु॒र्विँ॑शतिः)

(यदे॒के॑न॒ स पापी॑यानेतद्वा अ॒ग्नेर् धनु॒स्तद् दे॒वास्त्वेन्द्र॑ज्येष्ठाअ॒पान्नप्त्रेऽश्व॑स्तूप॒रो द्विष॑ष्टिः)

(यदे॒के॒ नैक॑शितिपा॒त् पेत्व॑ः)

॥ हरिः ॐ ॥

**पञ्चमकाण्डे पञ्चमः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| २४ | ६२ |

ॐ